# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर्-दिसम्बर्-२०१६

| | | |
|---|---|---|
| **कक्षा- आचार्य-२ (SEM-3)** | **प्रश्नपत्र-५** | **गुणा: - ७०** |
| **विषय:- साहित्यम्** | **CE-533** | **समय: - ११ त: ०२** |
| **दिनाङ्क: - २९/११/२०१६** | **सन्दर्भग्रन्थ: - हर्षचरितम्** | |

**॥ प्रथमान्विति: ॥**

**प्र-१ ससन्दर्भं व्याख्या कार्या ।** **०४**

१. नम: सर्वविदे तस्मै व्यासाय कवि वेधसे ।
चक्रे पुण्यं सरस्वत्या यो वर्षमिव भारतम् ॥

२. सन्ति श्वान इवासंख्या जातिभाजो गृहे गृहे ।
उत्पादका न बहव: कवय: शरभा इव ॥

**प्र-२ कस्याप्येकस्योत्तरं विस्तरेण दीयताम् ।** **१२**

१. हर्षचरितकर्तु: परिचयं यच्छत ।

२. गद्यं कवीनां निकषं वदन्ति - इति सूक्तिं समीक्षयत ।

**प्र-३ द्वयो: विवेचनां कुरुत ।** **०४**

१. मङ्गलपद्यं विविच्यताम् ।

२. वासवदत्तावर्णनं कुरुत ।

३. कविभाषवर्णनं कुरुत ।

**॥ द्वितीयान्विति: ॥**

**प्र-४ एकस्य ससन्दर्भं व्याख्यां कुरुत ।** **०४**

१. आलोकमपहाय कथं तमसि निमज्जसि । क्षमां हि मूलं सर्वतपसाम् परदोषदर्शनदक्षा दृष्टिरिव कुपिता वृद्धिर्न ते आत्मरागदोषं पश्यति ।

२. तरलयसि दृशं किमुत्सुकामकलुषमान सवासलालिते । अवतर कलहंसि वापिकां पुनरपि पास्यसि पङ्कजालयम् ॥

**प्र-५ ग्रन्थानुसारं सरस्वत्याश्चित्रं चित्रयन्तु ।** **०८**

**अथवा**

**हर्षचरितमनुसृत्य साविर्त्र्याच्चरित्रचित्रणं कुरुत ।**

**प्र-६ त्रयाणाम् एकैकवाक्येषु उत्तराणि ददत ।** **०३**

१. हर्षचरितस्य कर्ता क:?

२. प्रथमोच्छ्वासस्य नाम किम्?

३. सरस्वत्यै: क: शापम् अयच्छत्?

४. सर्वतपसां मूलं क:?

५. परमेष्ठिपुत्र्या: सरस्वत्या: प्रियतमा सखी का वर्तते?

**॥ तृतीयान्वितिः ॥**

**प्र-७ एकस्य ससन्दर्भं व्याख्यां कुरुत ।** **०४**

१. अथ स युवा पुरोयायिनां यथादर्शनप्रतिनिवृत्यातिविस्मितमनसां कथयतां पदातीनां सकाशादुपलभ्यदिव्याकृति तत्कन्यायुगलमुपजातकुतूहलः प्रतूर्णतुरगो दिदृक्षुस्तं लतामण्डपोद्देशमाजगाम ।

२. मन्दमन्दमारुतविधुतेः कुसुमरजोभिरदूषितलोचनाप्यश्रुजलं मुमोच ।

**प्र-८ कस्याप्येकस्य वर्णनं कुरुत ।** **०८**

१. दधीचवर्णनं यथाग्रन्थं विस्तरेण प्रतिपादयत ।

२. सरस्वत्याः आश्रमे यूनः समागमनवर्णनम् – ग्रन्थोक्तदिशा विविच्यताम् ।

**प्र-९ त्रयाणां लघूत्तराणि देयानि ।** **०३**

१. बाणभट्टस्य जन्म कस्मिन् नगरे अभवत्?

२. बाणस्य पितुः नाम किम्?

३. दधीचस्य पितुः नाम किम्?

४. विद्यायाः अधिष्ठात्री देवी का?

५. दुर्वासाः सरस्वतीं किं शशाप?

**॥ चतुर्थान्वितिः ॥**

**प्र-१० एकस्य ससन्दर्भं व्याख्या कार्या ।** **०४**

१. देवि, विज्ञाप्यं नः किञ्चिदस्ति रहसि, यतो मुहूर्तमवधानदानेन प्रसादं क्रियमाणमिच्छामि इति ।

२. अहमपि नाम सरस्वती यत्रामुना मनो जन्मना जानत्येव परवशीकृता । तत्र का गणनेतरासु तपस्विनीष्वति तरलासु तरुणीषु इति ।

**प्र-११ ग्रन्थोक्तदिशा बाणभट्टस्य चरित्रं चित्रयन्तु ।** **१२**

**अथवा**

**अक्षमालापुत्रवत्सतो वंशवृद्धिवर्णनं यथाग्रन्थं कुरुत ।**

**प्र-१२ द्वयोः विवेचना कार्या ।** **०४**

१. मालतीसंलापः ।

२. सरस्वतीगर्भधारणम् ।

३. सरस्वतीदधीचयोः संयोगः ।

४. वात्स्यायनवंशे कुबेरविप्रजन्म ।